Roll No. : .......................................

Total No. of Questions : **12** ] [ Total No. of Printed Pages : **4**

# AFMA–135

## M.A. (Final) Examination, 2023

## SANSKRIT

Paper - VI **(ख)**

## (वर्ग अ, ख साहित्य, आधुनिक साहित्य)

*Time : 3 Hours* ] [ *Maximum Marks : 100*

**खण्ड–अ** **(अंक : 2 × 10 = 20)**

**नोट** :– सभी **दस** प्रश्नों के उत्तर दीजिए (उत्तर-सीमा **50** शब्द)। प्रत्येक प्रश्न **2** अंक का है।

**खण्ड–ब** **(अंक : 8 × 5 = 40)**

**नोट** :– सात में से किन्हीं **पाँच** प्रश्नों के उत्तर दीजिए (उत्तर-सीमा **200** शब्द)। प्रत्येक प्रश्न **8** अंक का है।

**खण्ड–स** **(अंक : 20 × 2 = 40)**

**नोट** :– चार में से किन्हीं **दो** प्रश्नों के उत्तर दीजिए (उत्तर-सीमा **500** शब्द)। प्रत्येक प्रश्न **20** अंक का है।

**खण्ड–अ**

1. सर्वेऽपि **दश** प्रश्नाः समाधेयाः। प्रतिप्रश्नं हि अङ्कद्वयम्। उत्तरम् अधिकाधिकं **50** शब्दात्मकम्।

   (i) श्रीधरभास्करवर्णेकरस्य नाटकस्य नाम किमस्ति ?

   (ii) मधुच्छन्दा इत्याख्य काव्यस्य लेखकः कः ?

(iii) विवेकानन्दविजयात् कस्यापि एकस्य स्त्रीपात्रस्य नाम लिख्यताम्।

(iv) बाल्यकाले स्वामिनो विवेकानन्दस्य किम् नामासीत् ?

(v) पं. विद्याधरशास्त्रिणः कस्यापि एकस्याः रचनायाः नाम लिख्यताम्।

(vi) विवेकानन्द विजय–महानाटके कति अङ्काः सन्ति ?

(vii) ''विष्णोर्माया भगवती यया सम्मोहितं जगत्'' इत्युक्तिः कस्माद् ग्रन्थाद् उद्धृता ?

(viii) शिवराजविजयः इत्यस्मिन् नाम्नि शिवराजः कोऽस्ति ?

(ix) लेनिनामृतम् इति काव्यस्य कर्त्ता कोऽस्ति ?

(x) देवर्षि–कलानाथशास्त्रिणः पितुर्नाम किमासीत् ?

**खण्ड–ब**

**नोट** :– अत्र सप्तसु केचन पञ्चप्रश्नाः समाधेयाः। द्वितीयः तृतीयश्च प्रश्नः अनिवार्यः।

2. संस्कृत-व्याख्या सप्रसङ्गं क्रियताम्–

हिमाद्रिः किं मयानीतः विन्ध्याद्रिर्वा विनामितः।

हनूमतेव तीर्णोऽब्धिः पीतोऽगस्त्यर्षिणेव वा।

**अथवा**

दारिद्र्यं बालवैधव्ये पङ्गुत्वेऽप्यथवान्धता।

सुशीलत्वेऽपकीर्तिश्च तज्जीवन्मरणं ध्रुवम्॥

3. संस्कृतेन सप्रसंगम् अनुवादः क्रियताम्–

किं धनं किं बलं लोके का वा राज्ञां हि सत्कृतिः।

नैतिकं बलमाधेयं येन सर्वं प्रसिद्ध्यति॥

**अथवा**

बुद्धिर्यस्मिन् बलं यस्मिन् यस्मिन् कोषस्य सद्व्ययः।

राष्ट्रं तत्सर्वसम्पन्नं भवेद् राष्ट्रशिरोमणिः॥

4. निम्नलिखितस्य गद्यांशस्य पद्यस्य वा सप्रसङ्गं व्याख्या विधेया–

सखे! मम सुहृद्वरेण खेत्रीनरेशेण अत्र सम्प्रेषिताः बंगदेशीयाः पौरस्त्यपाश्चात्य-विद्यासु नदीष्णाः, तेजो विशेष विभ्राजमानमुखचन्द्राः, देदीप्यमान विशालनयनारविन्दाः, निर्मानमोहाः, जितसंगदोषाः, अध्यात्मनित्याः, श्रीविवेकानन्द-स्वामिनः। अपरम्पारा खलु स्वामिनां ब्रह्मीभूते स्वगुरौ श्रीरामकृष्णदेवे भक्तिः।

**अथवा**

शका हूणा म्लेच्छा रुधिररुचयो बर्बरगणाः

तथैवान्ये केचिद् य इह मदमत्ता उपगताः।

तवाग्रैर्हुङ्कारैर्मशकविनिपातं निपतिताः

न झंझासंरोधे प्रभवति तृणं तूलमथवा॥

5. अधस्तन गद्यखण्डस्य सप्रसङ्गमनुवादो विधेयः–

तत्क्षणमेव च ''कुत इदम् ? किमिदमिति दृश्यतां ज्ञायताम्'' इत्यादिश्य छात्रेषु विसृष्टेषु, क्षणानन्तरं छात्रेणैकेन भयभीता सवेगमत्युष्णं दीर्घं निःश्वसती, मृगीव व्याघ्राघ्राता, अश्रुप्रवाहैः स्नाता, सवेपथुः कन्यकैका अङ्के निधाय समानीता। चिरान्वेषणेनापि च तस्याः सहचरी सहचरो वा न प्राप्तः। तां च चन्द्रकलयेव निर्मिताम्, नवनीतेनेव रचिताम्, मृणालगौरीम्, कुन्दकोरकाग्रदतीम् सक्षोभं रुदतीमवलोक्यास्माभिरपि न पारितं निरोद्धं, नयनवाष्पाणि।

6. सप्रसङ्गमनूद्यतामेष गद्यखण्डः–

गौरसिंहस्तु ''कुटीरान्तः कन्यकास्ति, सा च यवनवधव्यसनिनि मयि जीवति न शक्या द्रष्टुमपि, किं न स्प्रष्टुम् ? तद् यावद् तव कवोष्णशोणिततृषित एष चन्द्रहासो न चलति, तावद् कूर्दनं वा उत्फालं वा यच्चिकीर्षसि तद् विधेह'' इत्युक्त्वा व्यालीढमर्यादया सज्जः समतिष्ठत्।

7. सप्रसंगं व्याख्या करणीया–

अमुक्तधैर्याः दृढ़निश्चयाश्च

ध्रुवं स्वसाध्ये जयिनो भवन्ति।

उत्साहसंकल्पबलान्वितानाम्

स्वयं सहाया प्रकृतिः स्वभावात्॥

8. मधुच्छन्दा-गीतीनां समीक्षा कार्या।

## खण्ड–स

**नोट** :– अत्र चतुर्षु प्रश्नेषु यथेच्छं किमपि प्रश्न**द्वयं** समाधेयम्। प्रत्येकं प्रश्नस्य 20 अङ्काः।

9. विद्याधरनीतिरत्नम् इति ग्रन्थस्य सूक्तीनां समीक्षा क्रियताम्।

10. वस्तु–नेता–रसाधारेण विवेकानन्दविजयस्य वैशिष्ट्यं प्रतिपाद्यताम्।

11. शिवराजविजयः संस्कृतस्य प्रथमः उपन्यासः वर्तते– इति कथनस्य विवेचनं सप्रमाणं क्रियताम्।

12. अधोलिखितेषु अर्वाचीन संस्कृत कविषु कयोश्चिद् **द्वयोः** विवरणं प्रस्तूयताम्–

    (i) डॉ. हरिरामाचार्यः

    (ii) पं. विद्याधरः शास्त्री

    (iii) श्री गणेशरामः शर्मा

    (iv) भट्ट मथुरानाथः शास्त्री